**Shikshan Sanshodhan : Journal of Arts, Humanities and Social Sciences** ISSN: 2581-6241
Monthly, Peer-Reviewed, Refereed, Indexed Journal Impact Factor: 5.146
Volume - 5, Issue - 5, MAY - 2022 Publication Date: 31/05/2022

DOIs:10.2018/SS/202205018 --:-- Research Article

# नवधाभक्तिस्वरुपावलोकनम्

**Mr. Dayambar Sabar**
Ph.D. Scholar Dept. of Sanskrit, Pondicherry University, Puducherry, India
Email - dayambarsans11@gmail.com,

**सारांश** : भक्तेः प्रधानभेदाः द्विविधाः साधनरूपसाध्यरूपश्च। साधनरूपस्यापरं नाम वैधः, स नवधा। एवं च साध्यरूपस्यापरं नाम प्रेमाप्रेमलक्षणम् इति। तन्मध्ये सेवा भवति साधनरूपा तथा प्रेमः भवति साध्यरूपः। अधुना विचार्यं यत्, सेवा का? यं प्रति ईश्वर सन्तुष्टः भवति, तदाकार भूत्वा सः यदि प्रभोः आज्ञानुसारेण आचरणं करोति, तमाचरणं सेवा इत्युच्यते। श्रीमद्भागवति भगवतः विष्णोः नाम रूपं गुणं प्रभावादेः श्रवणम्, कीर्तनं स्मरणं तथा भगवतः चरणसेवा, पूजनम्, वन्दनम्, भगवति दास्याभावं, सखाभावं तथा आत्मासमर्पणम् – एतानि नवविधानि भवन्ति भक्तिभेदाः।

**मख्यशब्दः** – भक्तिः, भक्तिरसः, नवधाभक्तिः, भक्तिस्वरूपम्।

**1. प्रस्थावना :**

भक्तिः सः साधनोऽस्ति यस्यानुष्ठानं सर्वे जीवाः कर्तु शक्नुवन्ति। यत्र च सर्वेषां मनुष्यानामधिकारः अस्ति। अस्मिन् कलियुगे आत्मोद्धारणार्थं भक्तिसदृशः कोऽपि उपायः नास्ति। यतो हि ज्ञान-योग-तपः-यागादयः अस्मिन् कलियुगे अतीव दुर्लभेन सिद्ध्यति तथा च जगति एतेषामुपयुक्तसामग्रादयोऽपि न मिलन्ति। तस्मादेव कारणात् कटिबद्धं भूत्वा ईश्वरस्य भक्तेः साधनमेव मनुष्याणां कर्तव्यम्। विचारः क्रियते चेत्, दृश्यते यत् अस्मिन् संसारे धर्मं स्वीकरोति इति याति मानवाः सन्ति। तेषु मानवेषु अधिकांशाः ईश्वरस्य भक्तिः कर्तुमिच्छन्ति। अस्माकं विचारकरणीयमस्ति यत्, ईश्वरः कः तथा तस्य भक्तिः पुनः कः? यः सर्वेषां शासनकर्ता, सर्वज्ञः सर्वशक्तिमान, सर्वान्तर्यामी, यः न्यायस्य सदाचारस्य च विधानं ददाति, यः सर्वेषां साक्षी, यः सर्वान् शिक्षां, बृद्धिं तथा ज्ञानं प्रददाति, यः गुणत्रयातीतं भूत्वापि लीलारूपेण गुणस्य भोक्ता, यस्य भक्तिना मनुष्याः समग्रात् दुर्गुणात् चुराचारात् तथा दुःखात् विमुक्तं भूत्वा परम पवित्राः भवन्ति। यः अव्यक्तं भूत्वापि जीवान् दयां कृत्वा जीवानां कल्याणस्य धर्मस्य च प्रचारः करोति, यः भक्तान् आश्रयदानार्थं स्वलीलाद्वारा समयानुसारेण देवमनुष्यदिरूपे व्यक्तो भवति अर्थात् साकाररूपेण प्रत्यक्षयोग्यं भूत्वा भक्तजनान् स्वेच्छानुसारेण दर्शनं दत्त्वा आह्लादितं करोति, यः सत्ययुगे श्रीहरिरूपे, त्रेतायुगे श्रीरामरूपे द्वापरयुगे श्रीकृष्णरूपे प्रकटितभगवत्, तं प्रेममयं नित्यम् विनाशी वीज्ञानानन्दघनं सर्वव्यापीं ईश्वरः इति रूपेण स्वीकरणीयम्।

महर्षिः शाण्डिल्यः भक्तिविषये उक्तवान्- “सा परानुरक्तिरिश्वरे” अर्थात् ईश्वरे परमः अनुरागः अर्थात् प्रेमः एव भक्तिः। देवर्षिः नारदोऽपि भक्तिसूत्रे कथितवान्-“सा स्वस्मिन् परमप्रेमरूपा” इति। तस्मिन् परमेश्वरेऽतिशयप्रेमरूपा एव भक्तिः। अपि च “अमृतस्वरूपा च” अर्थात् सा भक्तिः अमृतस्वरूपा।

भक्तेः प्रधानभेदाः द्विविधाः साधनरूपसाध्यरूपश्च। साधनरूपस्यापरं नाम वैधः, स नवधा। एवं च साध्यरूपस्यापरं नाम प्रेमाप्रेमलक्षणम् इति। तन्मध्ये सेवा भवति साधनरूपा तथा प्रेमः भवति साध्यरूपः। अधुना विचार्यं यत्, सेवा का? यं प्रति ईश्वर सन्तुष्टः भवति, तदाकार भूत्वा सः यदि प्रभोः आज्ञानुसारेण आचरणं करोति, तमाचरणं सेवा इत्युच्यते। अस्मिन प्रसङ्गे श्रीमद्भागवति प्रह्लादमहोदयः उक्तवान्-

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ इति

अर्थात् भगवतः विष्णोः नाम रूपं गुणं प्रभावादेः श्रवणम्, कीर्तनं स्मरणं तथा भगवतः चरणसेवा, पूजनम्, वन्दनम्, भगवति दास्याभावं, सखाभावं तथा आत्मासमर्पणम् – एतानि नवविधानि भवन्ति भक्तिभेदाः। भागवते नवविधभक्तिरेवं विवृता-

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दस्यं सख्यमात्मनिवेदनम्॥
इति पुंसाऽर्पिता विषणौ भक्तिश्चेन्नवलक्षणा।
क्रियते भगवत्यद्धा तन्मन्येऽधीतमुत्तमम्॥[1]

[1] श्रीमद्भा० ७।५।२३,२४

श्रवणं तन्नामादिशब्दानां परोक्तानां वा श्रोत्रेण ग्रहणम्, कीर्तनं तेषां स्वयमुच्चारणम्, स्मरणं तन्नामरूपादीनां मनसा चिन्तनम्, पादसेवनं परिचार्या प्रतिमादौ साधारणम्, अर्चनं पूजा जलादिषु , वन्दनं दण्डवत्प्रणामादि सर्वाङ्गैरभिवादनं वा, दास्यं कर्मार्पणम्, सख्यं तद्विश्वासादिः, आत्मनिवेदनं देहसमर्पणम्, यथा विक्रीतस्य गवाश्वदेर्मरणपालनादिचिन्ता न क्रियते तथा देहं तस्मै समर्प्य तच्चिन्तायर्जनमिति।

**श्रवणम् -** भगवत्प्रेमी भक्तैः उच्चार्यमाण भगवतः नाम-रूपम्-गुण-प्रभावम् , लीला, तत्वं, रहस्ययुक्तामृतमयीकथनस्योपरि श्रद्धा, प्रेमपूर्वकं श्रवणमपि च तस्यामृतमयीकथनं श्रुत्वा भगवत्प्रेमे मुग्धभावं यथा मृगः वीणाध्वनिं श्रुत्वा मुग्धं भवति तद्वत् मुग्धभावमित्यादयः श्रवणभक्तेः स्वरूपः।

**कीर्तनम् –** भगवतः नामरूपगुणप्रभावचरित्रतत्त्वरहसयान् च श्रद्धापूर्वकं तथा प्रेमपूर्वकमुच्चारणं कुर्वन् शरीरे रोमाञ्चः, कण्ठावरेधः, अश्रुपातः हृदयस्य प्रफुल्लता, मुग्धता इत्यादसः कीर्तनभक्तेः स्वरूपाः।

**स्मरणम् –** प्रभोः नाम-रूप-गुण-लीलात- तत्त्व-रहस्यमयामृतमयकथनं च यः व्यक्तिः श्रद्धापूर्वकं तथा प्रेमपूर्वकं श्रवणं पठनं, तस्य मननं, मननं कुर्वन् शरीरं शुद्धं कृत्वा भगवतः स्वरूपे लीनम् इत्येताः स्मरणभक्तेः स्वरूपाः।

**पादसेवनम् -** सञ्चिन्तयद् भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यम् ।
उत्तुङ्गरक्तविलसन्नखचक्रवाल ज्योत्स्नाभिराहतमहद्धृदयान्दकारम् ॥
यच्छौचनिःसृतसरित्प्रवरोदकेन तीर्थेन मूर्ध्न्यधिकृतेन शिवः शिवोऽभूत् ।
ध्यातुर्मनःशमलशैलनिसृष्टवज्रं ध्यायेच्चिरं भगवतश्चरणारविन्दम् ॥[2]

अर्थात् भगवतः यत् चरणकमलं वज्राङ्कुश-ध्वजः कमलादिचिह्नेन युक्तम्, यस्य शोभायुक्तरक्तवर्ण उन्नतनखमण्डलस्य प्रभावः भक्तस्य हृदये स्थितं महदन्धकारं पूर्णरूपेण विनश्यति, श्रीभगवतः तत् चरणकमलं सदा प्रेमपूर्वकं चिन्तनीयम्।

यस्मात् चरणप्रक्षालनजलात् निर्गतायाः गङ्गायाः पवित्रजलं मस्तकोपरि धारणं कृत्वा शिवः शिवत्त्वं प्राप्तम् तथा यत् चरणकमलं ध्यानीपुरुषस्यान्तःकरणेऽवस्थिताय पापरूपपर्वताय इन्द्रनिक्षिप्तं वज्रसदृशम्, अर्थात् यस्य ध्यानेन पापराशिं विनष्टं भवति, भगवतः तत् चरणकमलं सदा चिन्तनीयमिति।

श्रीभगवतः दिव्यमङ्गलमयरूपस्य धात्वादिमूर्तेः, चित्रपटस्य अथवा मानसमूर्तेः मनेहरचरणं श्रद्धापूर्वकं दर्शनम्, चिन्तनम् पूजनम् तथा च सेवनं कुर्वन् भगवतः प्रेमे तन्मयमेव पादसेवनमिति उच्यते।

**वन्दनम् -** भगवतः शास्त्रवर्णितं स्वरूपं, भगवतः नाम, तस्य धात्वादिमूर्तिं चित्रमथवा मानसिकमूर्तिं स्वशरीरेन मनसा च श्रद्धासहितं साष्टाङ्गप्रणामम्, तथा च सर्वान् चराचरभूतान् परमात्मनः स्वरूपं मत्वा श्रद्धापूर्वकं शरीरेन मनसा च प्रणामम् इत्यादिना भगवत्प्रेमे मुग्धता एव वन्दनाभक्तिः इत्युच्यते ।

**सख्यम् -** अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णे ब्रह्म सनातनम् ॥[3]

अर्थात् तस्य नन्दगोपस्य व्रजवासीगणानां भाग्यं धन्यमेव, योषां मित्रः परमानन्दपरिपूर्णः सनातनः ब्रह्मः। भगवतः प्रभावं तत्वं रहस्यं महिमां च ज्ञात्वा परमविश्वासपूर्वकं मित्रभावेन तस्य रूच्यनुसारेण कार्यकरणम्, तस्योपरि अन्यप्रेमप्रदर्शनम्, तस्य गुण-रूप-लीलान् प्रति मुग्धं भूत्वा नित्यनिरन्तररूपेण प्रसन्नभावमेव सख्यभक्तिः इत्युच्यते।

**आत्मनिवेदनम् -** परमात्मनः तत्त्वं रहस्यप्रभावमहिमादि च ज्ञात्वा दर्पाहङ्कारहितं भूत्वा स्वस्य शरीर-मन-धन-जनसहितं स्वयमेव सम्पूर्णं कर्म प्रति श्रद्धापूर्वकं परमप्रेमपूर्वकं च परमात्मनि समर्पणमेवात्मनिवेदनभक्तिः इत्युच्यते।

## 2. उपसंहारः

भगवत्प्राप्तये कर्म-योग-ज्ञानादयः सर्वे मार्गाः उत्तमाः। परन्तु शास्त्रे भक्तिमार्गस्य अतीव प्रशंसा दृश्यते। नवविधेषु भक्तिषु एकः भक्तिः यस्य हृदयेऽस्ति सः संसाररूसागरात् अनायासेन पारं भूत्वा भगवन्तं प्राप्नोति। तथा च प्रह्लादरूपः भक्तिः यस्य हृयते

---

[2] श्रीमद्भा० ३।२८।२१(२२

[3] श्रीमद्भा० १०।१४।३२

अस्ति तस्य तु नवभक्तिनामपि विकाशः भवति। उपरिल्लिखिते नवभक्तिवर्णने येषां भक्तानां नामोदाहरणानि परिदृश्यते तस्य हृदये केवलमेकसैव भक्तेः विकासः अभवत् तन्न परन्तु वहूनां भक्तिनां विकाशः आसीत्। तथापि यस्य यत् भावस्य प्राधान्यता आसीत् तस्य तत् भावस्यैव नामालिखत्। पुनः नामपि आगतमित्यपि दृश्यते। वस्तुतः सः व्यक्तिः धन्यः भवति यः भगवतः भक्तिविषये स्वस्य मनसं नियोजयति, तथा सः व्यक्तिः अधिको धन्यः भवति येन भगवतः भक्तः उत्पद्यते।

**सहायकग्रन्थसूची :**

1. . नारदीयभक्तिसूत्रम्, गीताप्रेस , गोरखपुर, २०१०
2. .वेदभाष्यभूमिकासंग्रहः, बलदेव उपाध्यायः, चौखम्बासंस्कृत संस्थान, वाराणसी, १९९२
3. . भक्तिरत्नावली, विष्णुपुरी, इण्डियान प्रेस, प्रयाग, १९१४
4. . श्रीमद्भागवतमहापुराणम्, गीताप्रसे , गोरखपुर, २०१४
5. . श्रीमद्भागवद्गीता, शङ्करभाष्यम्,गीताप्रसे , गोरखपुर, २०१०
6. . सुभषितरत्नभण्डागारः, नारायणराम्, आचार्य, निर्णयसागरप्रेस, मुंबई, २००९